Register Number:

Date:

ST. JOSEPH'S COLLEGE (AUTONOMOUS), BANGALORE-27

B.A. B.SC. SANSKRIT - II SEMESTER

SEMESTER EXAMINATION: APRIL 2019

SA 218 – SANSKRIT

Time - 2 1/2 hrs Max Marks - 70

I. दशानां प्रश्नानाम् एकवाक्येन संस्कृतभाषायाम् उत्तरत । 10×1=10

अ) सूर्यवंशः "रघुवंशः" इति कुतः प्रसिद्धः?

आ) देवादारुवृक्षस्य रक्षणं कः करोति?

इ) कौत्सः कस्य शिष्यः?

ई) इन्दुमत्याः स्वयंवरार्थं के के आगताः?

उ) 'त्रिस्रः बालकाः' इति शुद्धं वा न वा?

ऊ) संख्यासु तमप्-प्रत्ययः कदा युज्यते?

ऋ) ग्रन्थकोटिभिः उक्तं किम्?

ॠ) रामः जनकराजस्य सभायां किं कृतवान्?

लृ) का वरत्रयम् अयाचत?

ए) 'कश्चित्' इति कीदृशं पदम्?

ऐ) इन्द्रः रघोः कीदृशं वरं दत्तवान्?

ओ) जैत्राभरणं केन दत्तम् आसीत्?

II. आङ्लभाषायाम् अर्थं लिखत। 5×1=5

2. कल्लोलः

क. कशेरुकम्

ख. उपसेचनम्

ग. किङ्किणी

घ. आलवालम्

ङ. वटकम्

III. सन्धिं विभज्य अथवा संयोज्य नाम लिखत 5×1=5

3. स्थूलावेतौ

च. अपि + अवदत्

छ. दिव्यौषधम्

ज. वन + औषधम्

झ. प्रभाते + उत्तिष्ठति

ञ. दुःखेष्वनुद्वेगः

IV. श्लोकस्य अन्वयम्, अन्वयार्थं, तात्पर्यं च लिखत। 2×5=10

4. पूर्वं दत्तवरा देवी वरमेनमयाचत।
विवासनं च रामस्य भरतस्याभिषेचनम्॥

5. चित्रकूटं गते रामे पुत्रशोकातुरस्तथा।
राजा दशरथः स्वर्गं जगाम विलपन् सुतम्॥

6. रत्नैर्महाब्धेस्तुतुषुर्न देवा
न भेजिरे भीमविषेण भीतिम्
सुधा विना न प्रययुर्विरामं
न निश्चितार्थाद्विरमन्ति धीराः॥

V. एतासां पङ्क्तीनाम् अर्थं वर्णयत 5×2=10

7. आशा येषां दासी तेषां दासायते लोकः।

8. इन्द्रोऽपि लघुतां याति स्वयं प्रख्यातितैर्गुणैः।

9. बहुविघ्नास्तु सदा कल्याणसिद्धयः।

10. तीर्थं फलति कालेन सद्यः साधुसमागमः।

11. अनुक्तमप्यूहति पण्डितो जनः।

12. जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।

VI. सविस्तरं लिखत 1×10=10

13. श्लोकसहितं रघुवंशमधिकृत्य लिखत ।

14. रघुदेवेन्द्रयोः युद्धप्रसङ्गं वर्णयत।

VII. अधोलिखितम् अनुच्छेदं पठित्वा उत्तरं लिखत ।

एकदा राजकुमारः सिद्धार्थः विहारार्थम् उद्यानं गतः। सहसा क्रन्दनध्वनिं श्रुत्वा सः इतस्ततः अपश्यत्। बाणेन विद्धः एकः हंसः भूमौ पतितः आसीत्। एतद् दृष्ट्वा सिद्धार्थस्य चित्तं करुणया व्याकुलं जातम्। सः धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्के अधारयत्। अत्रान्तरे देवदत्तः धावन् तत्र प्राप्तः। सिद्धार्थस्य हस्ते हंसं दृष्ट्वा सः उच्चैः अवदत् – "सिद्धार्थ! एषः मम हंसः। मया बाणेन निपातितः। अतः मह्यं देहि।" सिद्धार्थः दृढतया अवदत् "अहं न दास्यामि। अहम् अस्य रक्षकः अस्मि।" तदा तौ विवादं कुर्वन्तौ राजसभां गतौ। राजा सर्वं वृत्तान्तम् आकर्ण्य आदिशत् – "यस्य पार्श्वे हंसः आगमिष्यति तस्यैव भविष्यति।" हंसः सिद्धार्थस्य समीपं गतवान्। सत्यमिदम् – भक्षकात् रक्षकः श्रेयान्।

पूर्णवाक्येन लिखत 4×1 = 4

15. हंसः कस्य समीपं गतवान्?

ट. तौ विवादं कुर्वन्तौ कुत्र गतौ?

ठ. सिद्धार्थः किं कृत्वा हंसम् अङ्के अधारयत्?

ड. सिद्धार्थः दृढतया किम् अवदत्?

16. भाषिकार्यम् 4×1 = 4

ढ. अनुच्छेदे 'श्रुत्वा' इति पदस्य समानार्थकं पदं किं प्रयुक्तम्?

१) इतस्ततः २) धावित्वा ३) आकर्ण्य ४) निष्कास्य

ण. अस्मिन् अनुच्छेदे 'रक्षकः' इति पदस्य किं विरुद्धपदं प्रयुक्तम्?

१) रक्षितः २) भक्षकः ३) तक्षकः ४) नक्षत्रः

त. ‘राजकुमारः सिद्धार्थः’ अस्मिन् वाक्ये विशेषणपदं किम्?

१) सिद्धार्थः २) राजकुमार ३) राजकुमारः ४) सिद्धार्थः

थ. “मया बाणेन निपातितः। अतः मह्यं देहि।” अस्मिन् वाक्ये ‘मह्यं’ पदं कस्मै प्रयुक्तम्?

१) देवदत्ताय २) सिद्धार्थाय ३) हंसाय ४) राज्ञे

द. उपर्युक्तस्य परिच्छेदस्य समुचितशिर्षकं लिखत 2

VIII. संस्कृते अनुवादं कुरुत , 10

The lion said “O King! Your compassion towards beings is justified. But you want to give up your body. A single cow can be saved by this act. If you live all your subjects will be protected. Do not think that your preceptor has only one cow. And if it is killed the preceptor will get angry. You can give crores of cows to Vasistha.”

Dilipa heard the words of the lion and said, “If you cannot save the cow, my life itself is in vain. You too are a (servant) dependent. You are looking after the tree. If the tree is destroyed, how can you face Ishvara? Hence, I am offering my body. Let go the cow that beings to my preceptor.”